UNIVERSITY OF CAMBRIDGE

EXAMINATION IN ASIAN AND MIDDLE EASTERN STUDIES FOR THE DEGREE OF MASTER OF PHILOSOPHY

1-Year MPhil in Sanskrit and South Asian Studies

---

Friday 10 June 2011 09:00 – 12:00

---

## SA.5 TEXTS IN CONTEXT: GRAMMATICAL LITERATURE

Answer **ALL** questions.

**STATIONERY REQUIREMENTS**
*20 Page Answer Book x 1*
*Rough Work Pad*

**SPECIAL REQUIREMENTS**
*None*

**You may not start to read the questions printed on the subsequent pages of this question paper until instructed that you may do so by the Invigilator.**

1 Translate into English: [20 marks]

अथवा पुनरस्तु ज्ञान एव धर्म इति । ननु चोक्तं ज्ञाने धर्म इति
चेत्तथाधर्म इति । नैष दोषः । शब्दप्रमाणका वयम् । यच्छब्द आह तदस्माकं
प्रमाणम् । शब्दश्च शब्दज्ञाने धर्ममाह नापशब्दज्ञाने ऽधर्मम् । यच्च पुनरशिष्टाप्र-
तिषिद्धं नैव तद्दोषाय भवति नाभ्युदयाय । तद्यथा । हिक्कितहसितकण्डूयितानि नैव
दोषाय भवन्ति नाप्यभ्युदयाय ॥ अथवाभ्युपाय एवापशब्दज्ञानं शब्दज्ञाने । यो
ऽपशब्दाञ्जानाति शब्दानप्यसौ जानाति । तदेवं ज्ञाने धर्म इति ब्रुवतो ऽर्थादापन्नं
भवत्यपशब्दज्ञानपूर्वके शब्दज्ञाने धर्म इति ॥ अथवा कूपखानकवदेतद्भविष्यति ।
तद्यथा कूपखानकः कूपं खनन्यद्यपि मृदा पांसुभिश्चावकीर्णो भवति सो ऽप्सु संजा-
तासु तत एव तं गुणमासादयति येन स च दोषो निर्हण्यते भूयसा चाभ्युदयेन
योगो भवत्येवमिहापि यद्यप्यपशब्दज्ञाने ऽधर्मस्तथापि यस्त्वसौ शब्दज्ञाने धर्मस्तेन
स च दोषो निर्घानिष्यते भूयसा चाभ्युदयेन योगो भविष्यति ॥ यदप्युच्यत आचारे
नियम इति याज्ञे कर्मणि स नियमः । एवं हि श्रूयते । यर्वाणस्तर्वाणो नामर्षयो
बभूवुः प्रत्यक्षधर्माणः परापरज्ञा विदितवेदितव्या अधिगतयाथातथ्याः । ते तत्रभ-
वन्तो यद्वा नस्तद्वा न इति प्रयोक्तव्ये यर्वाणस्तर्वाण इति प्रयुञ्जते याज्ञे पुनः
कर्मणि नापभाषन्ते । तैः पुनरसुरैर्याज्ञे कर्मण्यपभाषितं ततस्ते पराभूताः ॥

*Mahābhāṣya*, *Paspaśāhnika*

2 Translate into English: [30 marks]

### अपादानादीनां त्वप्रसिद्धिः ॥ १४ ॥

अपादानादीनां कर्तृत्वस्याप्रसिद्धिः । यथा हि भवता करणाधिकरणयोः कर्तृत्वं निदर्शितं न तथापादानादीनां कर्तृत्वं निदर्श्यते ॥

### न वा स्वतन्त्रपरतन्त्रत्वात्तयोः पर्यायेण वचनं वचनाश्रया च संज्ञा ॥ १५ ॥

न वैष दोषः । किं कारणम् । स्वतन्त्रपरतन्त्रत्वात् । सर्वत्रैवात्र स्वातन्त्र्यं पारतन्त्र्यं च विवक्षितम् । तयोः पर्यायेण वचनम् । तयोः स्वातन्त्र्यपारतन्त्र्ययोः पर्यायेण वचनं भविष्यति । वचनाश्रया च संज्ञा भविष्यति । तद्यथा । बलाहकाद्विद्योतते । बलाहके विद्योतते । बलाहको विद्योतत इति ॥ किं तर्ह्युच्यते ऽपादानादीनां त्वप्रसिद्धिरिति । एवं तर्हि न ब्रूमो ऽपादानादीनां कर्तृत्वस्याप्रसिद्धिरिति । पर्याप्तं करणाधिकरणयोः कर्तृत्वं निदर्शितमपादानादीनां कर्तृत्वनिदर्शनाय । पर्याप्तो ह्येकः पुलाकः स्थाल्या निदर्शनाय । किं तर्हि । संज्ञाया अप्रसिद्धिः । यावता सर्वत्रैवात्र स्वातन्त्र्यं विद्यते पारतन्त्र्यं च तत्र परत्वात्कर्तृसंज्ञैव प्राप्नोति* ॥ अत्रापि न वा स्वतन्त्रपरतन्त्रत्वात्तयोः पर्यायेण वचनं वचनाश्रया च संज्ञेत्येव ॥

यथा पुनरिदं भवता स्थाल्याः स्वातन्त्र्यं निदर्शितं संभवनक्रियां धारणक्रियां च कुर्वती स्थाली स्वतन्त्रेति क्वेदानीं परतन्त्रा स्यात् । यत्तत्प्रक्षालनं परिवर्तनं वा । न वा एवमर्थं स्थाल्युपादीयते प्रक्षालनं परिवर्तनं च करिष्यामीति । किं तर्हि । संभवनक्रियां धारणक्रियां च करिष्यतीति । तत्र चासौ स्वतन्त्रा । क्वेदानीं परतन्त्रा ॥ एवं तर्हि स्थालीस्थे यत्ने कथ्यमाने स्थाली स्वतन्त्रा कर्तृस्थे यत्ने कथ्यमाने परतन्त्रा ॥ ननु च भोः कर्तृस्थेऽपि वै यत्ने कथ्यमाने स्थाली संभवनक्रियां धारणक्रियां च करोति । तत्रासौ स्वतन्त्रा । क्वेदानीं परतन्त्रा ॥ एवं तर्हि प्रधानेन समवाये स्थाली परतन्त्रा व्यवाये स्वतन्त्रा । तद्यथा । अमात्यादीनां राज्ञा सह समवाये पारतन्त्र्यं व्यवाये स्वातन्त्र्यम् । किं पुनः प्रधानम् । कर्ता । कथं पुनर्ज्ञायते कर्ता प्रधानमिति । यत्सर्वेषु साधनेषु संनिहितेषु कर्ता प्रवर्तयिता भवति ॥

*Mahābhāṣya* ad A. 1.4.23, *Kārakāhnika*

(TURN OVER)

**3** Translate into English and comment on the forms listed below with the help of the sūtras: [50 marks]

क्ङिति च ॥ ५ ॥

निमित्तसप्तम्येषा । क्ङिन्निमित्ते ये गुणवृद्धी प्राप्नुतस्ते न भवतः । चितः, चितवान् । स्तुतः, स्तुतवान् । भिन्नः, भिन्नवान् । मृष्टः, मृष्टवान् । ङिति खल्वपि—चिनुतः, चिन्वन्ति । मृष्टः, मृजन्ति । गकारोऽप्यत्र चर्त्वभूतो निर्दिश्यते । 'ग्लाजिस्थश्च क्स्नुः'—जिष्णुः, भूष्णुः । इक इत्येव—कामयते, लैगवायनः ।

*मृजेरजादौ संक्रमे विभाषा वृद्धिरिष्यते* । संक्रमो नाम गुणवृद्धिप्रतिषेधविषयः । परिमृजन्ति, परिमार्ज्जन्ति; परिमृजन्तु, परिमार्ज्जन्तु । लघूपधगुणस्याप्यत्र प्रतिषेधः । अचिनवम्, असुनवमित्यादौ लकारस्य सत्यपि ङित्त्वे यासुटो ङिद्वचनं ज्ञापकम्—'ङिति यत्कार्यं तल्लकारे ङिति न भवति' इति ॥

Examples:

*citaḥ, citavān*
*cinutaḥ, cinvanti*
1.2.4, *sārvadhātukam apit* [*ṅit* 1]

*jiṣṇuḥ, (sthāsnu)*
8.4.55, *khari ca* (*jhalām* 53, *car* 54)
3.2.139, *glājisthaś ca ksnuḥ*
6.4.66, *ghumāsthāgāpājahātisāṃ hali* (*īt* 65, *ātaḥ* 64, *kṅiti* 63)

*kāmayati*
3.1.30, *kamer ṇiṅ*
7.2.116, *ata upadhāyāḥ* (*vṛddhiḥ* 114, *ññiti* 115)

*laigavāyana*
4.1.99, *naḍādibhyaḥ phak*
7.1.2, *āyaneyīnīyiyaḥ phaḍhakhachaghāṃ pratyayādīnām*
7.2.117, *taddhiteṣv acām ādeḥ* (*vṛddhiḥ* 114, *ññiti* 115)
7.2.118, *kiti ca*
6.4.146, *or guṇaḥ* (*bhasya* 129, *taddhite* 144)

*parimṛjanti / parimārjanti*
7.2.114, *mṛjer vṛddhiḥ*
7.2.101, *jarāyā jaras anyatarasyām* {{maṇḍūkaplutinyāya}}
7.3.86, *pugantalaghūpadhasya ca* (82, *guṇaḥ*)

*acinavan*
3.2.111, *anadyatane laṅ*
3.4.103, *yāsuṭ parasmaipadeṣūdātto ṅic ca* [*liṅaḥ* 102]

*Kāśikāvṛtti* ad A. 1.1.5

**END OF PAPER**